१. आयुर्वेदः कः भवति?

১। আয়ুর্বেদঃ কঃ ভবতি?

उत्तर : आयुस् + विद् + अच् = आयुर्वेदः। आयुसम्बन्धीयः वेदः आयुर्वेदः।

आयुर्हिताहितः व्याधेर्निदानं शमनं तथा।
विद्यते यत्र विद्वद्भिः स आयुर्वेदः उच्यते॥

উঃ আয়ুস্ + বিদ্ + অচ্ = আয়ুর্বেদঃ। আয়ুসম্বন্ধীয়ঃ বেদঃ আয়ুর্বেদঃ।

আয়ু র্হিতাহিতঃ ব্যাধের্নিদানং শমনং তথা।
বিদ্যতে যত্র বিদ্বদ্‌ভিঃ স আয়ুর্বেদঃ উচ্যতে॥

२. आयुस् शब्दस्य कोऽर्थः?

২। আয়ুস্ শব্দস্য কোঽর্থঃ?

उत्तर : एति गच्छतीति इन् + उसि + णिच् प्रत्ययनिष्पण्णः आयुशब्दः। आयुः जीवत्कालः।

प्रीणयन् देहमखिलं जीवयन् जठरानलम्।
शरीरप्राणयोरेवं संयोगादायुरुच्यते।

উঃ এতি গচ্ছতীতি ইন্ + উসি + ণিচ্ প্রত্যয় নিষ্পন্নঃ আয়ুশব্দঃ। আয়ুঃ জীবৎকালঃ।

প্রীণয়ন্ দেহমখিলং জীবয়ন্ জঠরানলম্।
শরীরপ্রাণয়োরেবং সংযোগাদায়ুরুচ্যতে॥

३. आयुर्वेदस्य लक्ष्यं किम्? स अन्यत् केन नाम्ना परिचितः भवति?

৩। আয়ুর্বেদস্য লক্ষ্যং কিম্? স অন্যৎ কেন নাম্না পরিচিতঃ ভবতি?

उत्तर : सुस्थजनस्य स्वास्थ्यरक्षणम् रोगस्य प्रतिकारश्च आयुर्वेदस्य लक्ष्यम्। आयुर्वेदः 'पञ्चमवेदः' इति नाम्नापि परिचितः भवति।

উঃ সুস্থজনস্য স্বাস্থ্যরক্ষণম্ রোগস্য প্রতিকারশ্চ আয়ুর্বেদস্য লক্ষ্যম্। আয়ুর্বেদঃ 'পঞ্চমবেদঃ' ইতি নাম্নাপি পরিচিতঃ ভবতি।

४. आयुर्वेदस्य स्रष्टा कः भवति? का च तस्य संहिता?

৪। আয়ুর্বেদস্য স্রষ্টা কঃ ভবতি? কা চ তস্য সংহিতা?

उत्तर : आयुर्वेदस्य स्रष्टा लोकपितामहः ब्रह्मा। तस्य आयुर्वेदसंहिता 'ब्रह्मसंहिता' इति ख्याता।

উঃ আয়ুর্বেদস্য স্রষ্টা লোকপিতামহঃ ব্রহ্মা।

তস্য আয়ুর্বেদসংহিতা 'ব্রহ্মসংহিতা' ইতি খ্যাতা।

५. ब्रह्मणः आयुर्वेदः केन प्राप्तः ? कश्च तस्य आयुर्वेदग्रन्थः ?

৫। ব্রহ্মণঃ আয়ুর্বেদঃ কেন প্রাপ্তঃ ? কশ্চ তস্য আয়ুর্বেদগ্রন্থঃ ?

उत्तर : ब्रह्मणः आयुर्वेदः प्रजापतिदक्षेण प्राप्तः ।

तस्य आयुर्वेदग्रन्थः 'दक्षसंहिता' नाम्ना परिचितः ।

উঃ ব্রহ্মণঃ আয়ুর্বেদঃ প্রজাপতিদক্ষেণ প্রাপ্তঃ।

তস্য আয়ুর্বেদগ্রন্থঃ 'দক্ষসংহিতা' নাম্না পরিচিতাঃ।

६. प्रजापतिदक्षेण आयुर्वेदः काभ्यां प्राप्तः ? तौ च कौ भवतः ? कश्च तयोः आयुर्वेदग्रन्थः प्रसिद्धः ?

৬। প্রজাপতিদক্ষেণ আয়ুর্বেদঃ কাভ্যাং প্রাপ্তঃ ? তৌ চ কৌ ভবতঃ ? কশ্চ তয়োঃ আয়ুর্বেদগ্রন্থঃ প্রসিদ্ধঃ ?

उत्तर : प्रजापतिदक्षेण अश्विनीकुमारौ आयुर्वेदः पठितौ ।

तौ अश्विनीकुमारौ देववैद्यौ भवतः ।

तयोश्च ग्रन्थः 'अश्विसंहिता' इति ख्याता ।

উঃ প্রজাপতিদক্ষেণ অশ্বিনীকুমারৌ আয়ুর্বেদঃ পঠিতৌ।

তৌ অশ্বিনীকুমারৌ দেববৈদ্যৌ ভবতঃ।

তয়োশ্চ গ্রন্থঃ 'অশ্বিসংহিতা' ইতি খ্যাতা।

७. अश्विनीकुमाराभ्याम् आयुर्वेदः केन प्राप्तः ? का च तस्य आयुर्वेद संहिता ?

৭। অশ্বিনীকুমারাভ্যাম্ আয়ুর্বেদঃ কেন প্রাপ্তঃ ? কা চ তস্য আয়ুর্বেদ সংহিতা ?

उत्तर : अश्विनीकुमाराभ्याम् आयुर्वेदः देवराजेन इन्द्रेण प्राप्तः ।

तस्य च संहिता 'इन्द्रसंहिता' इति ख्याता ।

উঃ অশ্বিনীকুমারাভ্যাম্ আয়ুর্বেদঃ দেবরাজেন ইন্দ্রেণ প্রাপ্তঃ।

তস্য চ সংহিতা 'ইন্দ্রসংহিতা' ইতি খ্যাতা।

८. धन्वन्तरिः कः आसीत् ? स कुतः जातः कदा च ?

৮। ধন্বন্তরিঃ কঃ আসীৎ ? স কুতঃ জাতঃ কদা চ ?

उत्तर : धन्वन्तरिः भगवतः विष्णोः अवतारः । स देववैद्यः ।

समुद्रमन्थनकाले स क्षीरसमुद्रात् अमृतकुम्भेन सह उत्थितः ।

উঃ ধন্বন্তরিঃ ভগবতঃ বিষ্ণোঃ অবতারঃ। স দেববৈদ্যঃ।

সমুদ্রমন্থনকালে স ক্ষীরসমুদ্রাৎ অমৃতকুম্ভেন সহ উত্থিতঃ।

९. मनुष्यलोके आयुर्वेदः केन प्रचारितः ?

৯। মনুষ্যলোকে আয়ুর্বেদঃ কেন প্রচারিতঃ?

उत्तर : मनुष्याणां हिताय धन्वन्तरिः काशीराज दिवोदासरूपेण आविर्भूतः अभवत्। तेन दिवोदासरूपेण धन्वन्तरिणा आयुर्वेदः मनुष्यलोके प्रचारितः जातः।

উঃ মনুষ্যাণাং হিতায় ধন্বন্তরিঃ কাশীরাজ দিবোদাসরূপেণ আবির্ভূতঃ অভবৎ। তেন দিবোদাসরূপেণ ধন্বন্তরিণা আয়ুর্বেদঃ মনুষ্যলোকে প্রচারিতঃ জাতঃ।

१०. धन्वन्तरिः आयुर्वेदस्य कस्मिन् विषये पारदर्शी आसीत्? तेन विरचितः ग्रन्थः कः भवति?

১০। ধন্বন্তরিঃ আয়ুর্বেদস্য কস্মিন্ বিষয়ে পারদর্শী আসীৎ? তেন বিরচিতঃ গ্রন্থঃ কঃ ভবতি?

उत्तर : धन्वन्तरिः आयुर्वेदस्य शल्यविषये पारदर्शी आसीत्? तेन विरचितः ग्रन्थः 'शल्यतन्त्रम्' इति प्रसिद्धः।

উঃ ধন্বন্তরিঃ আয়ুর্বেদস্য শল্যবিষয়ে পারদর্শী আসীৎ? তেন বিরচিতঃ গ্রন্থঃ 'শল্যতন্ত্রম্' ইতি প্রসিদ্ধঃ।

११. धन्वन्तरिमहाभागस्य प्रत्यक्षशिष्याः के आसन्?

১১। ধন্বন্তরিমহাভাগস্য প্রত্যক্ষশিষ্যাঃ কে আসন্?

उत्तर : धन्वन्तरिमहाभागस्य प्रत्यक्षशिष्याणाम् अन्यतमाः सुश्रुत–औपधेनव-औरभ्र–वैतरण–पौष्कलावत–करवीर्य–गोपुररक्षितप्रमुखाः।

উঃ ধন্বন্তরিমহাভাগস্য প্রত্যক্ষশিষ্যাণাম্ অন্যতমাঃ সুশ্রুত–ঔপধেনব-ঔরভ্র–বৈতরণ-পৌষ্কলাবত–করবীর্য-গোপুররক্ষিত প্রমুখাঃ।

१२. धन्वन्तरिजयन्ती का भवति?

১২। ধন্বন্তরিজয়ন্তী কা ভবতি?

उत्तर : मानवजीवने आयुर्वेदस्य उपयोगम् अनुभूय भारतसर्वकारेण प्रतिवत्सरं आश्विनमासस्य कृष्णा त्रयोदशीतिथौ 'धन्वन्तरिजयन्ती' आयुर्वेददिवसरूपेण पाल्यते। भारतीय जनजीवने अयञ्च दिवसः 'धनतेरास' इति परिचितः।

উঃ মানবজীবনে আয়ুর্বেদস্য উপযোগম্ অনুভূয় ভারতসর্বকারেণ প্রতিবৎসরং আশ্বিনমাসস্য কৃষ্ণা ত্রয়োদশীতিথৌ 'ধন্বন্তরিজয়ন্তী' আয়ুর্বেদদিবসরূপেণ পাল্যতে। ভারতীয় জনজীবনে অয়ঞ্চ দিবসঃ 'ধনতেরাস' ইতি পরিচিতঃ।

१३. आयुर्वेदः कस्य च वेदस्य उपाङ्गरूपेण स्वीकृतः?

১৩। আয়ুর্বেদঃ কস্য চ বেদস্য উপাঙ্গরূপেণ স্বীকৃতঃ?

उत्तर : सुश्रुतानुसारम् आयुर्वेदः अथर्ववेदस्य उपाङ्गः। किन्तु चरणव्यूहे आयुर्वेदः ऋग्वेदस्य उपाङ्गरूपेण व्यासदेवेन स्वीकृतः।

উঃ সুশ্রুতানুসারম্ আয়ুর্বেদঃ অথর্ববেদস্য উপাঙ্গঃ। কিন্তু চরণব্যূহে আয়ুর্বেদঃ ঋগ্বেদস্য উপাঙ্গরূপেণ ব্যাসদেবেন স্বীকৃতঃ।

१४. आयुर्वेदस्य मुख्यविभागद्वयं किमासीत्? कौ च कस्य प्रवर्तकौ?

১৪। আয়ুর্বেদস্য মুখ্যবিভাগদ্বয়ং কিমাসীৎ? কৌ চ কস্য প্রবর্তকৌ?

उत्तर : आयुर्वेदस्य मुख्यविभागद्वयम्—१। शल्यतन्त्रम्, २। कायचिकित्सातन्त्रम् च।

शल्यतन्त्रस्य प्रवर्तकः—भगवान् धन्वन्तरिः तथा काशीराजः दिवोदासः। कायचिकित्सा तन्त्रस्य प्रवर्तकः—महर्षिः भरद्वाजः।

উঃ আয়ুর্বেদস্য মুখ্যবিভাগদ্বয়ম্—১। শল্যতন্ত্রম্, ২। কায়চিকিৎসাতন্ত্রম্ চ।

শল্যতন্ত্রস্য প্রবর্তকঃ—ভগবান্ ধন্বন্তরিঃ তথা কাশীরাজঃ দিবোদাসঃ। কায়চিকিৎসা তন্ত্রস্য প্রবর্তকঃ—মহর্ষিঃ ভরদ্বাজঃ।

१५. महर्षिः भरद्वाजः केषां परामर्शानुसारं कुत्र गतवान्, कस्य सकाशात् च किम् अधीतवान्?

১৫। মহর্ষিঃ ভরদ্বাজঃ কেষাং পরামর্শানুসারং কুত্র গতবান্, কস্য সকাশাৎ চ কিম্ অধীতবান্?

उत्तर : हिमालयस्य पृष्ठदेशे अनुष्ठितस्य ऋषीणां महासम्मेलनस्य सिद्धान्तानुसारं महर्षिः भरद्वाजः अमरलोकं गतवान्।

अमरलोकं गत्वा महर्षिः भरद्वाजः देवराजस्य इन्द्रस्य सकाशात् आयुर्वेदम् अधीतवान्।

উঃ হিমালয়স্য পৃষ্ঠদেশে অনুষ্ঠিতস্য ঋষীণাং মহাসম্মেলনস্য সিদ্ধান্তানুসারং মহর্ষিঃ ভরদ্বাজঃ অমরলোকং গতবান্।

অমরলোকং গত্বা মহর্ষিঃ ভরদ্বাজঃ দেবরাজস্য ইন্দ্রস্য সকাশাৎ আয়ুর্বেদম্ অধীতবান্।

१६. महर्षेः भरद्वाजस्य मुख्यः शिष्यः कः आसीत्? तस्य विरचितः ग्रन्थः कः आसीत्?

১৬। মহর্ষেঃ ভরদ্বাজস্য মুখ্যঃ শিষ্যঃ কঃ আসীৎ? তস্য বিরচিতঃ গ্রন্থঃ কঃ আসীৎ?

उत्तर : महर्षेः भरद्वाजस्य मुख्यः शिष्यः आसीत् आत्रेयः पुनर्वसुः।

आत्रेयस्य रचितः आयुर्वेदग्रन्थः 'आत्रेयसंहिता' इति ख्यातः आसीत्?

উঃ মহর্ষেঃ ভরদ্বাজস্য মুখ্যঃ শিষ্যঃ আসীৎ আত্রেয়ঃ পুনর্বসুঃ।

আত্রেয়স্য রচিতঃ আয়ুর্বেদগ্রন্থঃ 'আত্রেয়সংহিতা' ইতি খ্যাতঃ আসীৎ?

१७. आत्रेयः पुनर्वसुः कः आसीत्?

১৭। আত্রেয়ঃ পুনর্বসুঃ কঃ আসীৎ?

उत्तर : आत्रेयः पुनर्वसुः ऋग्वेदस्य मन्त्रद्रष्टुः महर्षेः अत्रेः पुत्रः। सः महर्षेः भरद्वाजस्य प्रथमः शिष्यः आसीत्।

উঃ আত্রেয়ঃ পুনর্বসুঃ ঋগ্বেদস্য মন্ত্রদ্রষ্টুঃ মহর্ষেঃ অত্রেঃ পুত্রঃ। সঃ মহর্ষেঃ ভরদ্বাজস্য প্রথমঃ শিষ্যঃ আসীৎ।

१८. 'आत्रेयः पुनर्वसुः' इति नामकरणं कथं जातम्?

১৮। 'আত্রেয়ঃ পুনর্বসুঃ' ইতি নামকরণং কথং জাতম্?

उत्तर : महर्षेः अत्रेः पुत्रः इति अत्रि + ष्णेय = आत्रेयः।

पुनर्वसुनक्षत्रलग्ने जातत्वात् आत्रेयः 'पुनर्वसुः' इति नाम्नापि अभिहितः भवति।

উঃ মহর্ষেঃ অত্রেঃ পুত্রঃ ইতি অত্রি + ষ্ণেয় = আত্রেয়ঃ।

পুনর্বসুনক্ষত্রলগ্নে জাতত্বাৎ আত্রেয়ঃ 'পুনর্বসুঃ' ইতি নাম্নাপি অভিহিতঃ ভবতি।

१९. आयुर्वेदस्य तृतीया धारा का आसीत्? तस्याः धारायाः अनुसारिणः के आसन्?

১৯। আয়ুর্বেদস্য তৃতীয়া ধারা কা আসীৎ? তস্যাঃ ধারায়াঃ অনুসারিণঃ কে আসন্?

उत्तर : आयुर्वेदस्य तृतीया धारा काश्यपधारा।

तस्याः धारायाः अनुसारिणः यथा—काश्यपः > वशिष्ठः > अत्रिः > भृगुः > तेषां शिष्यप्रशिष्यवर्गश्च।

উঃ আয়ুর্বেদস্য তৃতীয়া ধারা কাশ্যপধারা।

তস্যাঃ ধারায়াঃ অনুসারিণঃ যথা—কাশ্যপঃ > বশিষ্ঠঃ > অত্রিঃ > ভৃগুঃ > তেষাং শিষ্যপ্রশিষ্যবর্গশ্চ।

२०. आत्रेय-पुनर्वसोः मुख्याः शिष्याः के आसन्?

২০। আত্রেয়-পুনর্বসোঃ মুখ্যাঃ শিষ্যাঃ কে আসন্?

उत्तर : आत्रेय-पुनर्वसोः मुख्याःशिष्याः अग्निवेशः, भेलः, जतुकर्णः, पराशरः, हारीतः, क्षारपाणिश्च।

উঃ আত্রেয়-পুনর্বসোঃ মুখ্যাঃ শিষ্যাঃ অগ্নিবেশঃ, ভেলঃ, জতুকর্ণঃ, পরাশরঃ, হারীতঃ, ক্ষারপাণিশ্চ।

२१. सुश्रुतस्य समयकालः कः आसीत्? कुत्र तस्य निवासः? तस्य ग्रन्थः केन नाम्ना परिचितः?

২১। সুশ্রুতস্য সময়কালঃ কঃ আসীৎ? কুত্র তস্য নিবাসঃ? তস্য গ্রন্থঃ কেন নাম্না পরিচিতঃ?

उत्तर : खीष्टपूर्वे षष्ठशतके सुश्रुतः वर्तमानः आसीत् इत्यनुमीयते। उत्तरभारतस्य काशीनगर्य्यां तस्य निवासः आसीत्। सुश्रुतस्य ग्रन्थः 'सश्रुतसंहिता' इति ख्यातः।

উঃ খ্রীষ্টপূর্বে ষষ্ঠশতকে সুশ্রুতঃ বর্তমানঃ আসীৎ ইত্যনুমীয়তে। উত্তরভারতস্য কাশীনগর্য্যাং তস্য নিবাসঃ আসীৎ। সুশ্রুতস্য গ্রন্থঃ 'সশ্রুতসংহিতা' ইতি খ্যাতঃ।

**२२. आयुर्वेदः 'अष्टाङ्गायुर्वेदः' इति कथं परिचितः ?**

**২২। আয়ুর্বেদঃ 'অষ্টাঙ্গায়ুর্বেদঃ' ইতি কথং পরিচিতঃ ?**

उत्तर : आयुर्वेदः मानवजीवस्य रोगव्याधिम् अष्टधा विभज्य निरामयोपायम् उपदिशति। तस्मात् आयुर्वेदशास्त्रे अष्टौ विभागाः सन्ति। अथ आयुर्वेदः 'अष्टाङ्गायुर्वेदः' नाम्ना परिचितः।

উঃ আয়ুর্বেদঃ মানবজীনবস্য রোগব্যাধিম্ অষ্টধা বিভজ্য নিরাময়োপায়ম্ উপদিশতি। তস্মাৎ আয়ুর্বেদশাস্ত্রে অষ্টৌ বিভাগাঃ সন্তি। অথ আয়ুর্বেদঃ 'অষ্টাঙ্গায়ুর্বেদঃ' নাম্না পরিচিতঃ।

**२३. आयुर्वेदस्य अष्टौ अङ्गानि कानि सन्ति ?**

**২৩। আয়ুর্বেদস্য অষ্টৌ অঙ্গানি কানি সন্তি ?**

उत्तर : कायचिकित्सातन्त्रम्, शल्यतन्त्रम्, शालाक्यतन्त्रम्, भूतविद्यातन्त्रम्, कौमारभृत्यतन्त्रम्, अगदतन्त्रम्, रसायणतन्त्रम्, वाजिकरणतन्त्रमिति इति आयुर्वेदस्य अष्टौ अङ्गानि।

উঃ কায়চিকিৎসাতন্ত্রম্, শল্যতন্ত্রম্, শালাক্যতন্ত্রম্, ভূতবিদ্যাতন্ত্রম্, কৌমারভৃত্যতন্ত্রম্, অগদতন্ত্রম্, রসায়ণতন্ত্রম্, বাজিকরণতন্ত্রমিতি ইতি আয়ুর্বেদস্য অষ্টৌ অঙ্গানি।

**२४. कायचिकित्सातन्त्रम् किम् ?**

**২৪। কায়চিকিৎসাতন্ত্রম্ কিম্ ?**

उत्तर : अस्त्रोपचारं विना औषधप्रयोगेन केवलं रोगनिरामयकरणं हि कायचिकित्सातन्त्रम्।

উঃ অস্ত্রোপচারং বিনা ঔষধপ্রয়োগেন কেবলং রোগ নিরাময়করণং হি কায়চিকিৎসাতন্ত্রম্।

**२५. कायचिकित्सातन्त्रस्य प्रधानाचार्यानां नाम कार्यम्।**

**২৫। কায়চিকিৎসাতন্ত্রস্য প্রধানাচার্যানাং নাম কার্যম্।**

उत्तर : आचार्यः अग्निवेशः, भेलः, जतुकर्णः, हारीतः, पराशरः, क्षारपाणिः, चरकादयः कायचिकित्सातन्त्रस्य प्रधानाचार्याः।

উঃ আচার্যঃ অগ্নিবেশঃ, ভেলঃ, জতুকর্ণঃ, হারীতঃ, পরাশরঃ, ক্ষারপাণিঃ চরকাদয়ঃ কায়চিকিৎসাতন্ত্রস্য প্রধানাচার্যাঃ।

२६. कायचिकित्सातन्त्रस्य केषाञ्चित् ग्रन्थानां नाम कार्यम्।

২৬। কায়চিকিৎসাতন্ত্রস্য কেষাঞ্চিৎ গ্রন্থানাং নাম কার্যম্।

उत्तर : अग्निवेशतन्त्रम्, भेलसंहिता, जतुकर्णसंहिता, हारीतसंहिता, पराशरसंहिता, क्षारपाणिसंहिता, चरकसंहिता च कायचिकित्सातन्त्रस्य मुख्याः ग्रन्थाः।

উঃ অগ্নিবেশতন্ত্রম্, ভেলসংহিতা, জতুকর্ণসংহিতা, হারীতসংহিতা, পরাশরসংহিতা, ক্ষারপাণিসংহিতা, চরকসংহিতা চ কায়চিকিৎসাতন্ত্রস্য মুখ্যাঃ গ্রন্থাঃ।

२७. शल्यतन्त्रं किम्?

২৭। শল্যতন্ত্রং কিম্?

उत्तर : शल्यं नाम अस्त्रं यन्त्रं वा। शरीरे शरीराभ्यन्तरे च रोगनिरामयार्थम् अस्त्रोपचारयोगेन चिकित्सा हि शल्यतन्त्रम्।

উঃ শল্যং নাম অস্ত্রং যন্ত্রং বা। শরীরে শরীরাভ্যন্তরে চ রোগনিরাময়ার্থম্ অস্ত্রোপচারযোগেন চিকিৎসা হি শল্যতন্ত্রম্।

२८. शल्यचिकित्सातन्त्रस्य प्रधानाचार्याः के आसन्?

২৮। শল্যচিকিৎসাতন্ত্রস্য প্রধানাচার্যাঃ কে আসন্?

उत्तर : सुश्रुतः औपधेनवः औरभ्रः वैतरणः पौष्कलावतः करवीर्यः गोपुररक्षितप्रमुखाः शल्य चिकित्सकाः शल्यचिकित्सातन्त्रस्य मुख्याचार्याः।

উঃ সুশ্রুতঃ ঔপধেনবঃ ঔরভ্রঃ বৈতরণঃ পৌষ্কলাবতঃ করবীর্যঃ গোপুররক্ষিতপ্রমুখাঃ শল্য চিকিৎসকাঃ শল্যচিকিৎসাতন্ত্রস্য মুখ্যাচার্যাঃ।

२९. शल्यचिकित्सातन्त्रस्य केषाञ्चित् मुख्यग्रन्थानां नाम कार्यम्।

২৯। শল্যচিকিৎসাতন্ত্রস্য কেষাঞ্চিৎ মুখ্যগ্রন্থানাং নাম কার্যম্।

उत्तर : सुश्रुतसंहिता, औपधेनवतन्त्रम्, औरभ्रतन्त्रम्, वैतरणतन्त्रम्, पौष्कलावततन्त्रम्, करवीर्यतन्त्रम्, गोपुररक्षिततन्त्रम् शल्यचिकित्सतन्त्रस्य मुख्याः ग्रन्थाः।

উঃ সুশ্রুতসংহিতা, ঔপধেনবতন্ত্রম্, ঔরভ্রতন্ত্রম্, বৈতরণতন্ত্রম্, পৌষ্কলাবততন্ত্রম্, করবীর্যতন্ত্রম্, গোপুররক্ষিততন্ত্রম্ শল্যচিকিৎসতন্ত্রস্য মুখ্যাঃ গ্রন্থাঃ।

३०. शालाक्यतन्त्रं किम्?

৩০। শালাক্যতন্ত্রং কিম্?

उत्तर : चक्षु–कर्ण–नासिका–जिव्हा–मुखमिति मुखमण्डलस्थितानाम् उपाङ्गानां चिकित्साविषयकं तन्त्रं शालाक्यतन्त्रम्।

উঃ চক্ষু-কর্ণ-নাসিকা-জিহ্বা-মুখমিতি মুখমণ্ডলস্থিতানাম্ উপাঙ্গানাং চিকিৎসাবিষয়কং তন্ত্রং শালাক্যতন্ত্রম্।

উঃ কাশ্যপসংহিতা, উশনঃসংহিতা, সনকসংহিতা, লাট্যায়ণ সংহিতা, নাগার্জুন তন্ত্রং চ অগদতন্ত্রস্য প্রাচীনপুস্তকম্। সুশ্রুতসংহিতায়াঃ কল্পস্থানে, চরকসংহিতায়াঃ চিকিৎসাস্থানস্য ত্রয়োবিংশঽধ্যায়েঽপি অগদচিকিৎসা আলোচিতা।

३९. रसायनतन्त्रं किम्?

৩৯। রসায়নতন্ত্রং কিম্?

उत्तर : जराव्याधिविनाशार्थं वृक्षलतागुल्मादिभ्यः औषध प्रस्तुतकरणविधिः, तेषां प्रयोगविधिश्च आयुर्वेदशास्त्रस्य रसायनतन्त्रमिति समाख्यातम्।

উঃ জরাব্যাধিবিনাশার্থং বৃক্ষলতাগুল্মাদিভ্যঃ ঔষধ প্রস্তুতকরণবিধিঃ, তেষাং প্রয়োগবিধিশ্চ আয়ুর্বেদশাস্ত্রস্য রসায়নতন্ত্রমিতি সমাখ্যাতম্।

४०. रसायनतन्त्रस्य प्राचीनपुस्तकानां नामोल्लेखं कार्यम्?

৪০। রসায়নতন্ত্রস্য প্রাচীনপুস্তকানাং নামোল্লেখং কার্যম্?

उत्तर : पातञ्जलतन्त्रम्, कक्षपुटतन्त्रम्, आरोग्यमञ्जरी, व्याडितन्त्रम्, वशिष्ठतन्त्रम्, माण्डव्यतन्त्रम् इति रसायणतन्त्रस्य प्राचीनपुस्तकम्।

উঃ পাতঞ্জলতন্ত্রম্, কক্ষপুটতন্ত্রম্, আরোগ্যমঞ্জরী, ব্যাড়িতন্ত্রম্, বশিষ্ঠতন্ত্রম্, মাণ্ডব্যতন্ত্রম্ ইতি রসায়নতন্ত্রস্য প্রাচীনং পুস্তকম্।

४१. वाजीकरणतन्त्र किम्?

৪১। বাজীকরণতন্ত্রং কিম্?

उत्तर : यौनव्याधेः चिकित्सा च वाजीकरणतन्त्रस्य विषयः। हीनवीर्यजनानां चिकित्सा, सन्तानोत्पादनशक्ति बृद्धिः विविधाना यौनरोगानां लक्षणं निदानं चिकित्साविषयश्च वाजीकरणतन्त्रस्य विषयः।

উঃ যৌনব্যাধেঃ চিকিৎসা চ বাজীকরণতন্ত্রস্য বিষয়ঃ। হীনবীর্যজনানাং চিকিৎসা, সন্তানোৎপাদনশক্তি বৃদ্ধিঃ বিবিধানাং যৌনরোগানাং লক্ষণং নিদানং চিকিৎসাবিষয়শ্চ বাজীকরণতন্ত্রস্য বিষয়ঃ।

४२. वाजीकरणतन्त्रस्य प्राचीनग्रन्थाः के सन्ति?

৪২। বাজীকরণতন্ত্রস্য প্রাচীনগ্রন্থাঃ কে সন্তি?

उत्तर : कुचुमारतन्त्रम्, अगस्त्यसंहिता, कौपालिकतन्त्रम् वाजीकरणतन्त्रस्य प्राचीनाः ग्रन्थाः। वात्स्यायणस्य कामशास्त्रेऽपि वाजीकरण चिकित्सापद्धतिः आलोचिता।

উঃ কুচুমারতন্ত্রম্, অগস্ত্যসংহিতা, কৌপালিকতন্ত্রম্ বাজীকরণতন্ত্রস্য প্রাচীনাঃ গ্রন্থাঃ। বাৎস্যায়নস্য কামশাস্ত্রেঽপি বাজীকরণ চিকিৎসাপদ্ধতিঃ আলোচিতা।

४३. दक्षिणभारते आयुर्वेदप्रचारस्य उद्गाता कः आसीत्? कश्च तेन विरचितः

গ্রন্থঃ ?

৪৩। দক্ষিণভারতে আয়ুর্বেদপ্রচারস্য উদ্‌গাতা কঃ আসীৎ? কশ্চ তেন বিরচিত

গ্রন্থঃ ?

उत्तर : दक्षिण भारते आयुर्वेदप्रचारस्य उद्‌गाता आसीत् महर्षिः अगस्त्यः। अगस्त्येन विरचितः ग्रन्थः अगस्त्यसंहिता इति ख्यातः।

উঃ দক্ষিণ ভারতে আয়ুর্বেদপ্রচারস্য উদ্‌গাতা আসীৎ মহর্ষিঃ অগস্ত্যঃ। অগস্ত্যেন বিরচিতঃ গ্রন্থঃ অগস্ত্যসংহিতা ইতি খ্যাতঃ।

**४४. वैदिकसाहित्ये कुत्र आयुर्वेदज्ञानं परिलक्ष्यते ?**

৪৪। বৈদিকসাহিত্যে কুত্র আয়ুর্বেদজ্ঞানং পরিলক্ষ্যতে ?

उत्तर : वैदिकसाहित्यस्य ऋग्वेदे, अथर्ववेदे, शतपथब्राह्मणे च आयुर्वेदज्ञानस्य परिचयः परिलक्ष्यते।

উঃ বৈদিকসাহিত্যস্য ঋগ্‌বেদে, অথর্ববেদে, শতপথব্রাহ্মণে চ আয়ুর্বেদজ্ঞানস্য পরিচয়ঃ পরিলক্ষ্যতে।

**४५. वैदिक साहित्ये कुत्र अस्त्रोपचारः उल्लिखितः ?**

৪৫। বৈদিক সাহিত্যে কুত্র অস্ত্রোপচারঃ উল্লিখিতঃ ?

उत्तर : 'सद्योजङ्घामायासीं विश्‌पलायै धने हिते सर्तवे प्रत्यधत्तम्' (ऋग्वेदः)—युद्धे आहतायाः विश्‌पलायाः लौहमयी जङ्घा देववैद्याभ्याम् अश्विनीकुमाराभ्यां अस्त्रोपचारेण संयोजिता।

উঃ 'সদ্যোজঙ্ঘামায়াসীং বিশ্‌পলায়ৈ ধনে হিতে সর্তবে প্রত্যধত্তম্' (ঋগ্বেদঃ)—যুদ্ধে আহতায়াঃ বিশ্‌পলায়াঃ লৌহময়ী জঙ্ঘা দেববৈদ্যাভ্যাম্ অশ্বিনীকুমারাভ্যাং অস্ত্রোপচারে সংযোজিতা।

**४६. त्रिदोषतत्त्वं किम्।**

৪৬। ত্রিদোষতত্ত্বং কিম্।

उत्तर : आयुर्वेदानुसार वातः पित्तं कफश्च त्रिदोषरूपेण विवेचितः। वातपित्तकफानां विपर्ययात् मनुष्यशरीरं रोगग्रस्तं भवति इति आयुर्वेदस्य मतम्।

উঃ আয়ুর্বেদানুসার বাতঃ পিত্তং কফশ্চ ত্রিদোষরূপেণ বিবেচিতঃ। বাতপিত্তকফানাং বিপর্যয়াৎ মনুষ্যশরীরং রোগগ্রস্তং ভবতি ইতি আয়ুর্বেদস্য মতম্।

**४७. पञ्चवायुः कः भवति ?**

৪৭। পঞ্চবায়ুঃ কঃ ভবতি ?

उत्तर : पञ्चप्राणाः पञ्चवायुः। प्राण-अपान-समान-उदान-व्यानश्चेति पञ्चप्राणाः तथा पञ्चवायवः भवन्ति।

উঃ পঞ্চপ্রাণাঃ পঞ্চবায়ুঃ। প্রাণ—অপান—সমান—উদান—ব্যানশ্চেতি পঞ্চপ্রাণাঃ তথা পঞ্চবায়বঃ ভবন্তি।

४८. आयुर्वेदस्य तृतीयः सम्प्रदायः कः भवति? तस्य च सम्प्रदायस्य प्रसिद्धाचार्याणां नाम कार्यम्।

৪৮। আয়ুর্বেদস্য তৃতীয়ঃ সম্প্রদায়ঃ কঃ ভবতি? তস্য চ সম্প্রদায়স্য প্রসিদ্ধাচার্যাণাং নাম কার্যম্।

उत्तर : रसचिकित्सातन्त्रम् तथा रसतन्त्रम् आयुर्वेदस्य तृतीयः सम्प्रदायः। रसशास्त्रस्य प्रसिद्धाचार्येषु आदिनाथः चन्द्रसेनः, नित्यानन्दः, गोरक्षनाथः कपालिः भालुकिः, माण्डव्यशेति अन्यतमाः।

উঃ রসচিকিৎসাতন্ত্রম্ তথা রসতন্ত্রম্ আয়ুর্বেদস্য তৃতীয়ঃ সম্প্রদায়ঃ। রসশাস্ত্রস্য প্রসিদ্ধাচার্যেষু আদিনাথঃ চন্দ্রসেনঃ, নিত্যানন্দঃ, গোরক্ষনাথঃ কপালিঃ, ভালুকিঃ, মাণ্ডব্যশ্চেতি অন্যতমাঃ।

४९. रसचिकित्साशास्त्रस्य विशेषत्वं किमस्ति?

৪৯। রসচিকিৎসাশাস্ত্রস্য বিশেষত্বং কিমস্তি?

उत्तर : वृक्षलतागुल्मादीन् अतिरिच्य पारदघटितातानां धातुघटितानाम् औषधानां प्रयोगः एव रसवैद्यानां विशेषत्वम्।

উঃ বৃক্ষলতাগুল্মাদীন্ অতিরিচ্য পারদঘটিতাতানাং ধাতুঘটিতানাম্ ঔষধানাং প্রয়োগঃ এব রসবৈদ্যানাং বিশেষত্বম্।

५०. षडङ्गशरीरं किम्?

৫০। ষড়ঙ্গশরীরং কিম্?

उत्तर : आयुर्वेदशास्त्रे मनुष्य शरीरं षडङ्गशरीरम् इति वर्णितम्। अत्र षडाङ्गानि यथा—हस्तद्वयं पदद्वयं मध्यशीररं मस्तकञ्च।

উঃ আয়ুর্বেদশাস্ত্রে মনুষ্য শরীরং ষড়ঙ্গশরীরম্ ইতি বর্ণিতম্। তত্র ষড়াঙ্গানি যথা—হস্তদ্বয়ং পদদ্বয়ং মধ্যশরীরং মস্তকঞ্চ।

५१. आयुर्वेदानुसारम् उत्तमाङ्गं किं भवति? कथं तत् उत्तमाङ्गम्?

৫১। আয়ুর্বেদানুসারম্ উত্তমাঙ্গং কিং ভবতি? কথং তৎ উত্তমাঙ্গম্?

उत्तर : आयुर्वेदानुसारम् उत्तमाङ्गं मस्तकम्।

मस्तके संज्ञावहचेष्टावहनाडीनाम् अवस्थानम्। बुद्धीन्द्रियस्य अधिष्ठानमपि मस्तकम्। मनन-चिन्तनादीनाम् अधिष्ठानं मस्तिष्कमपि मस्तके वर्तते। अथ मस्तकम् उत्तमाङ्गम्।

উঃ আয়ুর্বেদানুসারম্ উত্তমাঙ্গং মস্তকম্।
মস্তকে সংজ্ঞাবহচেষ্টাবহনাড়ীনাম্ অবস্থানম্। বুদ্ধীন্দ্রিয়স্য অধিষ্ঠানমপি মস্তকম্। মনন-চিন্তনাদীনাম্ অধিষ্ঠানং মস্তিষ্কমপি মস্তকে বর্ততে। অথ মস্তকম্ উত্তমাঙ্গম্।

५२. षडङ्गशरीरसम्पर्कितज्ञानलाभार्थम् आयुर्वेदे किमुपदिष्टम्?

৫২। ষড়ঙ্গশরীরসম্পর্কিতজ্ঞানলাভার্থম্ আয়ুর্বেদে কিমুপদিষ্টম্?

उत्तर : षडङ्गशरीरसम्पर्कितज्ञानलाभार्थम् आयुर्वेदे शवव्यवच्छेदः उपदिष्टः।

উঃ ষড়ঙ্গশরীসম্পর্কিতজ্ঞানলাভার্থম্ আয়ুর্বেদে শবব্যবচ্ছেদঃ উপদিষ্টঃ।

५३. शवव्यवच्छेदः कः भवति?

৫৩। শবব্যবচ্ছেদঃ কঃ ভবতি?

उत्तर : शरीरसम्बन्धीयज्ञानलाभार्थम् अस्त्रोपचारयोगेन सुसंरक्षितं मृतदेहं उन्मोच्य शरीराभ्यन्तरस्थितानाम् अङ्गप्रत्यङ्गानां विश्लेषणं हि शव्यववच्छेदः।

উঃ শরীরসম্বন্ধীয়জ্ঞাননলাভার্থম্ অস্ত্রোপচারযোগেন সুসংরক্ষিতং মৃতদেহং উন্মোচ্য শরীরাভ্যন্তরস্থিতানাম্ অঙ্গপ্রত্যঙ্গানাং বিশ্লেষণং হি শব্যববচ্ছেদঃ।

५४. आयुर्वेदे शवव्यवच्छेदप्रथायाः अवलुप्तेः कारणं किं भवति?

৫৪। আয়ুর্বেদে শবব্যবচ্ছেদপ্রথায়াঃ অবলুপ্তেঃ কারণং কিং ভবতি?

उत्तर : मूलतः बौद्धधर्मप्रभावात् आयुर्वेदे शवव्यवच्छेदप्रथायाः अवलुप्तिः जाताः। बौद्धयुगे बौद्धराजानः भगवतः बुद्धस्य अहिंसामन्त्रमनुसृत्य शवव्यवच्छेदविषये निरुत्साहाः जाताः। एतदर्थं क्रमेण आयुर्वेदस्य इयं प्रथा भारतवर्षे अवलुप्तिः अभवत्।

উঃ মূলতঃ বৌদ্ধধর্মপ্রভাবাৎ আয়ুর্বেদে শবব্যবচ্ছেদপ্রথায়াঃ অবলুপ্তিঃ জাতাঃ। বৌদ্ধ যুগে বৌদ্ধরাজানঃ ভগবতঃ বুদ্ধস্য অহিংসামন্ত্রমনুসৃত্য শবব্যবচ্ছেদবিষয়ে নিরুৎসাহাঃ জাতাঃ। এতদর্থং ক্রমেণ আয়ুর্বেদস্য ইয়ং প্রথা ভারতবর্ষে অবলুপ্তিঃ অভবৎ।

५५. आयुर्वेदानुसारं यथार्थचिकित्सा का भवति?

৫৫। আয়ুর্বেদানুসারং যথার্থচিকিৎসা কা ভবতি?

उत्तर : यात्युदीर्णं शमयति नान्यं व्याधिं करोति च।
सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत्।।

উঃ যাত্যুদীর্ণং শময়তি নান্যং ব্যাধিং করোতি চ।
সা ক্রিয়া ন তু যা ব্যাধিং হরত্যন্যমুদীরয়েৎ।।

५६. आयुर्वेदानुसारं पञ्चकर्म किं भवति?

৫৬। আয়ুর্বেদানুসারং পঞ্চকর্ম কিং ভবতি?

उत्तर : साधारण स्वास्थ्यरक्षणार्थम् आयुर्वेदे पञ्चकर्म उपदिष्टम्। तानि पञ्चकर्माणि

উঃ সুশ্রুতসংহিতায়াং ষট্ বিভাগাঃ সন্তি।
তে চ বিভাগাঃ—সূত্রস্থানম্, নিদানস্থানম্, শারীরস্থানম্, চিকিৎসাস্থানম্, কল্পস্থানম্ উত্তরতন্ত্রঞ্চ।

६८. सुश्रुतसंहितायाः टीकाकारेषु अन्यतमाः के आसन्?

৬৮। সুশ্রুতসংহিতায়াঃ টীকাকারেষু অন্যতমাঃ কে আসন্?

उत्तर : बौद्धचिकित्सकः नागार्जुनः, डल्लनः (निवन्धसंग्रहः), चक्रपाणिदत्तः (भानुमती) सुश्रुत संहितायाः टीकाकारेषु अन्यतमाः आसन्।

উঃ বৌদ্ধচিকিৎসকঃ নাগার্জুনঃ, ডল্লনঃ (নিবন্ধসংগ্রহঃ), চক্রপাণিদত্তঃ (ভানুমতী) সুশ্রুত সংহিতায়াঃ টীকাকারেষু অন্যতমাঃ আসন্।

६९. सुश्रुतसंहितायाः मुख्यः प्रतिसंस्कारकः कः आसीत्?

৬৯। সুশ্রুতসংহিতায়াঃ মুখ্যঃ প্রতিসংস্কারকঃ কঃ আসীৎ?

उत्तर : बौद्ध चिकित्सकः नागार्जुनमहाभागः सुश्रुतसंहितायाः मुख्यप्रतिसंस्कारकः आसीत्। 'बृद्धसुश्रुतसंहिता' इति कश्चित् सुश्रुतसंहितायाः प्रतिसंस्कृतः ग्रन्थ अपि प्राप्यते।

উঃ বৌদ্ধ চিকিৎসকঃ নাগার্জুনমহাভাগঃ সুশ্রুতসংহিতায়াঃ মুখ্যপ্রতিসংস্কারকঃ আসীৎ। 'বৃদ্ধসুশ্রুতসংহিতা' ইতি কশ্চিৎ সুশ্রুতসংহিতায়াঃ প্রতিসংস্কৃতঃ গ্রন্থঃ অপি প্রাপ্যতে।

७०. सुश्रुतसंहितायां कतिविधः अस्त्रोपचारः विहितः? के च ते?

৭০। সুশ্রুতসংহিতায়াং কতিবিধঃ অস্ত্রোপচারঃ বিহিতঃ? কে চ তে?

उत्तर : सुश्रुतसंहितायां सप्तविधः अस्त्रोपचारः विहितः।
ते च अस्त्रोपचाराः —छेद्यम्, लक्ष्यम्, भेद्यम्, एस्यम्, आहार्य्यम्, वश्रयम्, सिव्यञ्च।

উঃ সুশ্রুতসংহিতায়াং সপ্তবিধঃ অস্ত্রোপচারঃ বিহিতঃ।
তে চ অস্ত্রোপচারাঃ—ছেদ্যম্, লক্ষ্যম্, ভেদ্যম্, এস্যম্, আহার্য্যম্, বশ্রয়ম্, সিব্যঞ্চ।

७१. सुश्रुतसंहितायां कतिविधाः शल्यचिकित्साः उल्लिखिताः आसन्? तत्र कतिविधानि शल्यशस्त्राणि उल्लिखितानि?

৭১। সুশ্রুতসংহিতায়াং কতিবিধাঃ শল্যচিকিৎসাঃ উল্লিখিতাঃ আসন্? তত্র কতিবিধানি শল্যশস্ত্রাণি উল্লিখিতানি?

उत्तर : सुश्रुतसंहितायां ३०० शल्यचिकित्साः उल्लिखिताः।
तत्र १२० संख्यकानि शल्यशस्त्राणि उल्लिखितानि।

উঃ সুশ্রুতসংহিতায়াং ৩০০ শল্যচিকিৎসাঃ উল্লিখিতাঃ।
তত্র ১২০ সংখ্যকানি শল্যশস্ত্রাণি উল্লিখিতানি।

२. सुश्रुतसंहितायां कतिविधाः रोगव्याधयः उल्लिखिताः ? तत्रोल्लिखिताः औषधानां च संख्या का भवति ?

২। সুশ্রুতসংহিতায়াং কতিবিধাঃ রোগব্যাধয়ঃ উল্লিখিতাঃ ? তত্রোল্লিখিতাঃ ঔষধানাং চ সংখ্যা কা ভবতি ?

तर : सुश्रुतसंहितायां ११२० प्रकाराः रोगव्याधयः उल्लिखिताः । तत्र ७०० संख्यकानां वृक्षलतागुल्मादीनाम् उल्लेखः व्याधिनिरामयार्थम् कृतः ।

সুশ্রুতসংহিতায়াং ১১২০ প্রকারাঃ রোগব্যাধয়ঃ উল্লিখিতাঃ। তত্র ৭০০ সংখ্যকানাং বৃক্ষলতাগুল্মাদীনাম্ উল্লেখঃ ব্যাধিনিরাময়ার্থম্ কৃতঃ।

३. चरकः कः आसीत् ?

৩। চরকঃ কঃ আসীৎ ?

तर : आत्रेयः पुनर्वसुसम्प्रदायस्य विख्यातः कायचिकित्सकः चरकः । सः आत्रेयशिष्यस्य अग्निवेशचार्यस्य 'अग्निवेशसंहिता' इति आयुर्वेदग्रन्थस्य प्रतिसंस्कारकः ।

আত্রেয়ঃ পুনর্বসুসম্প্রদায়স্য বিখ্যাতঃ কায়চিকিৎসকঃ চরকঃ। সঃ আত্রেয়শিষ্যস্য অগ্নিবেশাচার্যস্য 'অগ্নিবেশসংহিতা' ইতি আয়ুর্বেদগ্রন্থস্য প্রতিসংস্কারকঃ।

१०. भारतवर्षस्य प्रसिद्धायुर्वेदशिक्षाप्रतिष्ठानानां केषाञ्चित् चतुर्णां नाम कार्यम्।

১০। ভারতবর্ষস্য প্রসিদ্ধায়ুর্বেদশিক্ষাপ্রতিষ্ঠানানাং কেষাঞ্চিৎ চতুর্ণাং নাম কার্যম্।

उत्तर : (क) श्रीधन्वन्तरि आयुर्वेदिक कलेज, चण्डीगड,

(ख) राजीवगान्धी इन्सिटिउट अव हेल्थ् सायेन्स, व्यङ्गालोर,

(ग) ऋषिकुल गर्भेमेन्ट पि. जि. आयुर्वद केलज एण्ड हसपिटाल, हरिद्वार।

(घ) न्याशानाल इनस्टटिउट अव आयुर्वद, जयपुर, इत्यादयः।

উঃ (ক) শ্রীধন্বন্তরি আয়ুর্বেদিক কলেজ, চণ্ডীগড়,

(খ) রাজীবগান্ধী ইন্সিটিউট অব হেল্থ্ সায়েন্স, ব্যাঙ্গালোর,

(গ) ঋষিকুল গর্ভনমেন্ট পি. জি. আয়ুর্বেদ কলেজ এণ্ড হসপিটাল, হরিদ্বার,

(ঘ) ন্যাশনাল ইনস্টটিউট অব আয়ুর্বেদ, জয়পুর, ইত্যাদয়ঃ।

আলোচিতা।

८४. केन च वैदेशिकशासकेन रोगविनिश्चयः कया भाषया कुत्र च अनूदितः ?

৮৪। কেন চ বৈদেশিকশাসকেন রোগবিনিশ্চয়ঃ কয়া ভাষয়া কুত্র চ অনূদিতাঃ?

उत्तर : वाग्दादनगरस्य शासकेन हारूण-अल-रशिद महाभागेन रोगविनिश्चयः पारसीक भाषया तत्र अनूदितः।

উঃ বাগ্‌দাদনগরস্য শাসকেন হারুণ-অল-রশিদ মহাভাগেন রোগবিনিশ্চয়ঃ পারসীক ভাষয়া তত্র অনূদিতঃ।

८५. शार्ङ्गधरः कः आसीत्? कश्च तस्य ग्रन्थः ?

৮৫। শার্ঙ্গধরঃ কঃ আসীৎ? কশ্চ তস্য গ্রন্থঃ?

उत्तर : दक्षिणभारतस्य विजयनगरस्य अधिवासी प्रसिद्धायुर्वेदाचार्यः शार्ङ्गधरः। तस्य ग्रन्थः शार्ङ्गधरपद्धतिः।

উঃ দক্ষিণভারতস্য বিজয়নগরস্য অধিবাসী প্রসিদ্ধায়ুর্বেদাচার্যঃ শার্ঙ্গধরঃ। তস্য গ্রন্থঃ শার্ঙ্গধরপদ্ধতিঃ।

८६. कस्य च राज्ञः शासनकाले कदा च शार्ङ्गधरस्य आविर्भावः जातः।

৮৬। কস্য চ রাজ্ঞঃ শাসনকালে কদা চ শার্ঙ্গধরস্য আবির্ভাবঃ জাতঃ।

उत्तर : दक्षिणभारतस्य विजयनगरराजस्य वीरवुक्कमहाराजस्य शासनकाले पञ्चदशशतके शार्ङ्गधरः आविर्भूतोऽभवत्।

উঃ দক্ষিণভারতস্য বিজয়নগররাজস্য বীরবুক্কমহারাজস্য শাসনকালে পঞ্চদশশতকে শার্ঙ্গধরঃ আবির্ভূতোঽভবৎ।

८७. भावमिश्रः कः आसीत्। तस्य समयकालः निवासश्च कः भवति?

৮৭। ভাবমিশ্রঃ কঃ আসীৎ। তস্য সময়কালঃ নিবাসশ্চ কঃ ভবতি?

उत्तर : आयुर्वेदाचार्य भावमिश्रः प्रसिद्धः संग्रहकारः।
तस्य समयकालः खीष्टीयषोडशशतकः।
तस्य निवासः आसीत् उत्तर भारतस्य कान्यकुब्जनगरे।

উঃ আয়ুর্বেদাচার্য ভাবমিশ্রঃ প্রসিদ্ধঃ সংগ্রহকারঃ।
তস্য সময়কালঃ খ্রীষ্টীয়ষোড়শশতকঃ।
তস্য নিবাসঃ আসীৎ উত্তর ভারতস্য কান্যকুব্জনগরে।

८८. भावमिश्रस्य आयुर्वेदग्रन्थः कः भवति। तस्मिन् ग्रन्थे किम् आलोचितमभवत्?

৮৮। ভাবমিশ্রস্য আয়ুর্বেদগ্রন্থঃ কঃ ভবতি। তস্মিন্ গ্রন্থে কিম্ আলোচিতমভবৎ?

उत्तर : भावमिश्रस्य आयुर्वेदग्रन्थः भावप्रकाशः।